

# भारतमुद्रा।

(५२त्तमराज्यस्तरीय-स्कूल्-कलोत्सवस्य विशिष्टसम्पुटः)

२१-०१-२०१२

## स्नियायै टोमयासप्रकटनविधायकस्य पुरस्कारः।

तृश्शिवपुरम् - संस्कृतोत्सवे सं स्कृतगानालपनस्पर्धायां प्रथमस्थानविजेत्रे कश्चन विशिष्टपुरस्कारः वर्षेs स्मिन् समायोजितः। दशसहस्रधनराशिना सह प्रशस्तिपत्रमपि अन्तर्भूतोs यं पुरस्कारः पावरट्टि कुरियाक्कुमास्टर् स्मारकरूपेण आयोजितोs स्ति। इदानीं पुरनाट्टुकरायां मुख्यकार्यालयस्थ पि.टि. कुरियाक्कुमास्टर् गुरुवायूर् केन्द्रीयमानितसंस्कृतविश्वविद्यालयरूपेण (P.T. KURIYAKKU MASTER GURUVAYUR KENDRIYA SANSKRIT DEEMED UNIVERSITY) प्रवर्तमानस्य विद्यापीठस्य स्थापकस्य नाम्नि तद्भक्तैः संस्कृतबन्धुभिः टोमयास् प्रकटनविधायकैः (TOMYAS ADVERTISERS) समायोजितोS स्ति अयं पुरस्कारः। वर्षेs स्मिन् पुरनाट्टुकरा श्री शारदा बालिकोच्चतरविद्यालयीयछात्री ' सिन्या सुधीष् ' नामिका पुरस्कारार्हा अभवदिति दैवनियोगः।

ह्यः अस्माभिः निवेदितमासीत् यत् संस्कृतविजेतारः माध्यमैः

अवगण्यत इति। इयमेव छात्री आसीत् एषियाजालेन ह्यः अवगणिता। निरुत्तरदायिना एकेन जालसंघेन तिरस्कृतापि साद्य सायं केरलीयसांस्कृतिकराजधान्याः तिलकायमानात् केरलसाहित्या-क्कादम्यङ्गणात् केरलकलामण्डलस्य कुलपतिसकाशात् सत्कृतपुरस्कारा इत्येतत् सर्वानपि संस्कृतबन्धुजनान् आनन्दबाष्पपूरितनयनानकरोत्। पुरस्कारप्रदानसमारोहे अस्मत् मुख्यसम्पादकः अशोकन् पुरनाट्टुकरामहोदयः सदः तां पर्यचायत्। टोमयासधिपस्य तोमस् पावरट्टी महोदयस्य, एन्. राजगोपालमहाशयस्य, नववाणीसम्पादकस्य जोस् महाशयस्य च सान्निध्येन सम्पूरितं तत् सदः उच्चतरविद्याभ्यासमेखलाधिकारिण्याः रोसम्मा एब्रहामस्य सान्निध्यं राजकीयां प्रौढिं प्रास्थापयत्।

समारोहस्यास्य उद्घाटनं केलसाहित्याक्कदम्याः उपाध्यक्षः श्री बालचन्द्रन् वटक्केटत्त् महोदयः निरवहत् यस्यां सामान्यविद्याभ्यासविभागस्य सहाधिकारिणी वि.के सरलम्मा अध्यक्षपदमलङ्कृतवती।

# प्रतिषेधः।

संस्कृतं प्रति न केवलं सर्वकारेण स्वकार्यमाध्यमप्रवर्तकैश्च क्रियमाणां अवगणनां प्रति संस्कृतबान्धवानां प्रतिषेधः जाज्वलत् -

मध्याह्ने द्वादशवादने मुख्यवेदिकायाः परिसरे अत्यातपे माध्यमलोकस्य पुरः ।

विश्वस्य अतिप्रचरितासु षड्भाषासु अन्यतमा वर्तते अरबिभाषेति ऐक्यराष्ट्रसभया अङ्गीकृतम्। अरबिसाहित्योत्सवः अपि युवजनोत्सवस्य अङ्गत्वेन प्रचलत्यत्र।

भारतस्य सांस्कृतिकं, चारित्रियिकं किं बहुना, जीवातुभूता अस्ति संस्कृतभाषा। तत्प्रचारणाय आयोजितः संस्कृतोत्सवः अपि कलोत्सवेन सह प्रचलति।

परन्तु प्रधानोत्सवस्य अङ्गभूतौ इमौ सर्वत्र सर्वथा सर्वैः अवगण्येते। तस्य दृष्टान्तं ह्यः अस्माभिः प्रदर्शितमासीत्। इमाम् अवगणनां प्रतिरोद्धुमेव संस्कृतबान्धवानां प्रतिषेधः मुख्यवेदिकायाः समीपे मध्याह्ने द्वादशवादने समभवत्। केरलीयमाध्यमेषु प्रमुखस्य कैरलीमाध्यमस्य पुरः एवासीत् प्रतिषेधप्रकटनम्। संस्कृतमवगणयत् नपुंसकरूपेण प्रवर्तमानं जालान्तरमपि तत्परिसर एवासीत्। तत्र वस्त्राभरणयुक्तानां वर्णशबलानां प्रकटनानां प्रसारणे दत्तश्रद्धाः आसन् सांस्कृतिकमूल्यमजानन्तः जालप्रवर्तकाः। परन्तु ते जानन्तु बहुसहस्रेभ्यः वर्षेभ्यः प्राक् भारतमहाराष्ट्रे सर्वत्र प्रसृतेयं संस्कृतसंस्कृतिः। तेषां दुर्बलानाम् अचिरस्थायिनां जालेन नैव ग्राह्यं

कदाचन इति।



उच्चविद्यालयस्तरीय-कूटियाट्टस्पर्धायां इरिङ्गालक्कुटा नाषणल् उच्चविद्यालयीयछात्रैः अवतारितं जटायुवधम्। स्पर्धायां एषः संघः प्रथमस्थानं प्राप्तवन्तः।